**विद्या भवन बालिका विद्यापीठ लखीसराय**

**वर्ग दशम् विषय संस्कृत शिक्षक श्यामउदय सिंह**

**ता:-२४/०६/२०२० (बोर्ड बेस्ड क्वेश्चन)**

**अधोलिखितश्लोकौ पठित्वा तदाधारितानां प्रश्नानां उत्तराणि लिखत-**

**श्लोक:-न चैनं सहसाक्रम्य जरा समधिरोहति ।**

**स्थिरीभवति मांसं च व्यामाभिरतस्य च ।।**

(१) एकपदेन उत्तरत-

(क)मनुष्यस्य जीवने का साहस आक्राम्य समधिरोहति ?(ख)जरा कीदृशस्य जनस्य समीपं सहसा न समधिगच्छति? (२) पूर्णवाक्येन उत्तरत-

जनस्य मांसं कथं स्थिरीभवति?

(३)भाषिककार्यम्-

(क)'वार्धक्यम्'इत्यर्थे किं पदम् अत्र प्रयुक्तम्?(ख)'न चैनं सहसाक्राम्य' अत्र 'एनम' पदं कस्मै प्रयुक्तम्?

(ग)'अवरोहति'इति पदस्य विपर्ययपदं पद्यांशे किम्?(घ)'संलग्नस्य'इति पदस्य पर्यायपदं पद्यांशे किम्? **श्लोक:-वयोबलशरीराणि देशकालाशनानि च।**

**समीक्ष्य कुर्याद् व्यायाममन्यथा रोगमाप्नुयात्।।**

(१) एकपदेन उत्तरत -

(क)व्यायामशील:जन: कानि समीक्ष्य कुर्यात्?(ख)अन्यथा जन: कं आप्नुयात्?

(२) पूर्णवाक्येन उत्तरत -व्यायामशील: कदा रुग्ण:न भवति?

(३) भाषिककार्यम् -

(क)'भोजनानि' इत्यर्थे किं पदं अत्र प्रयुक्तम्?

(ख)'कुर्याद्'इति क्रियापदस्य कर्तृपदं किं ?

(ग)'आयु:' इति पदस्य पर्यायपदं किं?

(घ)'रोगमाप्नुयात्' अत्र क्रियापदं किं?